२०३

વાર્તામાળા
સંપૂર્ણ ૨૯
રામાનુજાચાર્યે લિખેલા

लक्ष्मीनाथसमारंभां नाथयामुनमध्यमां अस्मदाचार्यपर्यंतां वंदे गुरुपरंपरां १

वैष्णव ग्रंथोपयु
विशिष्टाद्वैतम्

वार्तामाला पत्र २९
श्रीहरयेनमः

1

श्री·भा· १

श्रीमते रामानुजाय नमः ॥ स्वस्वरूपसीमा तदीयशेषत्वं ॥ परस्वरूपसीमा सर्वोत्तरः
विरोधिस्वरूपसीमा अहंकारममकारौ ॥ उपायस्वरूपसीमा भगवत्स्वरूपा ॥ उपेयस्व
रूपसीमा सुखोल्लासः ॥ ज्ञानं निवृत्तं रिवानो ॥ नडाधुलि म्माालुम्मानाचार्याः
कैदालतोलप्पहम्माचार्यास्सन्निधानंगतो मंवनारं श्रीभाष्यं अकलापुनरेकवार
मानापर्यन्तं त्विनिवित्ज्ञापने कृतं नं नछु त्लामरदानौवाई कंजातं कथनसामर्थ्यं नाति
मद्नुवत्पैवधौलालत्वारुम्माचार्यास्सौं सन्निधौ श्रुत्वेत्या ज्ञापितः ॥ तत्र भगवा
शंभ्रणाम्य श्रीभाष्यं पुनरेकवारं श्रावयंत्विति विज्ञापिता लेनमुच्ः ॥ इतरद
र्शननिरासार्थं वास्वदर्शनस्थापनार्थं वादर्शनार्थी न्त्वनुवा श्रीभाष्यमुपग्रा
ह्कमर्थं त्युन्तौ ॥ इतरदर्शननिरसनस्वदर्शनस्थापने स्वाभिनामेव त्रपोजनं रासः
सन्निम्पिनौ हं दर्शनार्थं न्विदित्वाकनार्थो भविष्यामी त्याशयतः ॥ तच्छ्रुत्वानै

वंत:

वी॰ मा॰
२

म। परमभागवतनियमने सति शोके न वा तमयावाऽनवस्थायां विषयप्र
वणस्य पुरुषस्य शय्यायामिव विषयपारुष्यमेव भोग्यं यथा भवति तथा भो
ग्यमित्यनुसंधायस्थितिः। फलयाथात्म्यज्ञानं नाम॥ आत्मेश्वरप्राप्तिं कृत्वा प्राप्यमपि
विरजायाः पारं गंतुमुत्सुकः सन्नपि रोगादिभिः तस्य त्वरया न पेक्षते यं कंचन वे
लवं द्रष्टुं मातृवत् पितृवत् द्रष्टुं नार्थमप्यपि स्यानुमिच्छाकरो नो नियतं॥ उ

२

पायज्ञानं नाम चतुर्विधं। संबंधज्ञानं। संबंधयाथात्म्यज्ञानं संबंधस्वरूपज्ञानं सं
बंधस्वरूपयाथात्म्यज्ञानं। संबंधज्ञानं तु श्रियःपत्युर्निरुपाधिकशेषित्वं स्व
स्य निरुपाधिकशेषत्वज्ञानं च सम्यक् ज्ञात्वा स्थितिः। संबंधयाथात्म्यज्ञानं। श्रि
यःपत्युर्निरुपाधिकशरीरित्वं स्वस्य निरुपाधिशरीरत्वं ज्ञात्वा स्थितिः। संबंध
स्वरूपज्ञानं नाम। श्रियःपत्युर्निरुपाधिकधर्मित्वं स्वस्य निरुपाधिकधर्मत्वं च

पा॰ १

क॰ २

रूपदिचंसारार्थचतुष्टयं॥ श्रीरामानुजाचार्याणां चरणयुगलमेवसर्वस्वमि
तिस्थिता॥ अस्मदाचार्याः पूर्वंस्वप्रयोजनमितिधारकमितिभोग्यमितिमत्वा
चानुसंधायउपदिष्टाऽतिष्ठन्॥ तद्यथा स्वरूपज्ञानं स्वरूपयाथात्म्यज्ञानं॥१॥ विरोधि
ज्ञानं विरोधियाथात्म्यज्ञानं॥२॥ फलज्ञानं फलयाथात्म्यज्ञानं॥३॥ उपायज्ञानं उपाय
याथात्म्यज्ञानं॥४॥ तत्रस्वरूपज्ञानंनाम। ज्ञानानंदादिकवृत्तिं पुत्रादिवद्दासमिति
मत्वा भगवदनन्यार्हशेषत्वमेवस्वरूपमितिस्थितिः॥ स्वरूपयाथात्म्यज्ञानंनामभ
गवदनन्यार्हशेषत्वेवहिर्वृत्तिः पुत्रादिवद्दासमितिमत्वा भागवतशेषत्वमेवस्व
रूपमितिस्थितिः। विरोधिज्ञानंनाम। परमभागवतशेषत्वेमनोऽनार्द्रमिवभवती
ति यतं॥ विरोधियाथात्म्यज्ञानंनाम। कदाचित्कथंचित्कस्यचिद्भागवतस्यसंश्ले
षेलब्धेसतितत्रापिदोषोदृश्यतेइत्यनुतप्तः सन्नानंदेतेइतिनियतम्। फलज्ञानंना

ना॰ मा॰
२

वृत्तिस्तु देहाभिमानिनां मध्ये ऽन्यं नन्निकृष्टोहमसत्कल्पइंद्रियजितो हं तु एवं
विधं मां ऽप्रयस: स्ववर्गीकृत्वा ऽऽचार्य्यान्मा स्मज्ज्ञानमुपदिश्य एवमंगीकृतवंत
इति कृतज्ञतया स्थिति: । कर्त्तव्ये कर्त्तव्यं नाम । वयं निषिद्धानि परित्यज्य विहि
तान्येव कुर्वन्त: स्थिता इति ऽस्मस्मानंगीकृतवानिति स्वप्रवृत्ते हेतुत्वकल्प
नं । तन्निवृत्तिः ऽस्मस्त्वापार: कोपि नास्तिदारु पुत्रिकानाटके [illegible] वनिषिद्धानि
त्याजयित्वा विहितानि कारयतीति स्थिति: । मोक्षे कर्त्तव्यं नाम । वयं तु
सेवां कुर्वन्त: स्थिता इति स्थिति: । तन्निवृत्तिस्तु स्वहस्तेन स्वकेश संस्कार
कृते ऽन्योन्यमुपकारस्तु स्तुतिर्यथा न भवति तथैवावयवभूतेनात्मनावयविन:
श्रिय: पत्यु: कैंकर्यं क्रियमाणं सन्निसृतीति युत । एवंविधसदाचार्य्यसंप्रदा
यासिद्धार्थी: । एकमाचार्य्यमंगीकृत्य मुमुक्षुणा ऽवश्यं ज्ञातव्या: । श्रीमतेरामा

3

सम्यक्ज्ञानात्वास्थितिः। संबंधस्वरूपयाथात्म्यज्ञानेन तु धर्मिधर्मयोरैक्यं सम्य
क्ज्ञानात्वास्थितिः। एकत्वं नाम विशिष्टविशेषणभेदमितिस एवं सन्स्वरूपयथानप्रका
शनेनथा वस्थितिः॥ उपाययाथात्म्यज्ञानेन नाम तन्निष्ठा॥ तन्निष्ठा नाम। शे
षत्वे कर्तृत्वनिवृत्तिः १ ज्ञातृत्वे कर्तृत्वनिवृत्तिः कर्तृत्वे कर्तृत्वनिवृत्तिः ३
भोक्तृत्वे कर्तृत्वनिवृत्तिश्च ४॥ शेषत्वे कर्तृत्वं राजा स्वयं जगत्पीडां कुर्वतो मे
ष्ठिण इव भगवद्दासत्वासदाचारस्थापनं कृत्वा निष्ठतीति नियतं। तत्र सदाचारो
नाम। शास्त्रविहितविषयेभ्यो भयं भगवद्भागवतकैंकर्येषु रतिश्च एतत्रसंभव रति
नीति यत्नदेवस्थापनं॥ तन्निवृत्तिर्नाम। ग्रामादिकविषयस्पर्शश्च ग्रामादिक
कैंकर्यविश्लेषश्च नोटेनीति यत्॥ ज्ञातृत्वे कर्तृत्वे लेच वयं ज्ञानारदीति कल्प
त्वलुप्रियः पत्निरस्मानं गीहत्वनावामुख्नि लजलनलमहेतुत्वेकल्पनं॥ तन्नि

नी. भा.

६

श्रु... जाभिमानेनाल्पास्थिरफलकृद्य एकान्तेऽन्यदेवतोपासनादिकर्मः क्वचास्थि
तिः ॥ ४ ॥ अन्यदेवतोपासकैः शुद्ध्यादिसाधनस्थानस्य भाष्यादिकं सम्यक् परित्यज्य स्थितिः
॥ ५ ॥ अष्टपिष्टपाककरणं महत्त्वदेशत्वाद्यं भेषजतरनिपातितमहामूषिकं इवेऽर्थसंबंधादि
निमित्तभोजनासनशयनाद्यनुसंधानकृतविपरीतज्ञानोदये श्रीवैष्णवगोष्ठीनहि...तः
स्मृ...हति इति ॥ ५ ॥ शिरःछेदाभिषेकपर्यंतं महापातकसंपदादि...सुरान्नधर्मवच्युतिर्यथा नम्र...
ति तथा दृष्टाऽध्यवसायकाऽऽगतः ...इति स्थितिः ॥ अत्रेदृशं तं भूताः पाद्युन...
आचार्याश्च श्रीवत्सचिह्नाचरणाचार्याश्च शिवान्यतरंनाली...
परानिन्युक्तवंतो ऽनएवकृतसत्ताऽपरसमयेपिस्वीयधर्मोऽत्यागः ॥ ६ ॥ सामान्यशास्त्रे दृष्टि
महत्त्वाविशेषशास्त्रदर्शनानुष्ठाने स्वाभिमानं गोपयित्वा स्थितिरस्मिन्ननुष्ठाने श्रीमान्
भरतश्चलितकंठ... आचार्याश्च प्रमाणभूताः सर्वोत्तमनदनुष्ठानं अस्माभिः
स्वपुत्रमन्त्रं खल्वितितनमंतव्यं ॥ आरोहकस्य प्रसादितः हस्तवशोनिश्चितं खलु तुरंगः अ

साधनांतरेण मंत्रांतरेण प्रयोजनांतरेण देवतांतरेण मतांतरेण

आंध्रपूर्णा

भगवत्कैंकर्य्यग्रामभोजनं आचार्य्यकैंकर्य्यस्य च्छकभोजनं भागवतकैंकर्य्यमात्रहलभो
जनं वडुदनंबीयंगार्आचार्य्याणांनां अथश्रीभट्टारकाणांनंजीयरुकइयांवश्यान
घनिद्यानां अमूल्यैः सद्भिर्द्रव्यैः पूरिता नैकासमुद्रमध्ये विपरीतवायुनेव वातन्नत्थुपर्वत
शिखरताडनेनवा समुद्रिककल्लोलघातेनवा महामत्स्यपुच्छादिविहतेनवा अपती
कारचौरनौकयाबाधया नाशंप्राप्नोति तथाश्रियःपत्युःश्रीपादपद्मयुगलैकतानप
शिष्यभगवद्भागवतनाविषयदानाद्यानकृतापचारैर्नरोयेनाशपर्यंतं प्राप्नोति तद्व्यसन
भावनानिवृत्यर्थं एतानुद्दश्यार्थानुक्त्वा सम्यक्तु अनुशयनिर्भरःसन्नुद्वासं सं
दत्वासुखेननिद्रांप्राप्नोति ॥ नरवोत्यंतं ॥ आचार्य्यः श्रीभगवच्चितैकभवनमथसर्वत
थाशरीरार्थप्राणमयं कल्लापिबा कार्य्यमेकसम्भृत्कुर्यात् ॥ अतोहिमृदयेश्रीवैष्णवसमाय व
एषकल्याणगुणः भागवतविषये एषयत्कैंकर्य्यंकरोति तत्सर्वभावेनाभिमत्वयथाल्पं वंतितथा
स्थितिः ॥ २ ॥ सर्वसाक्षीसन्स्वांतर्निवासंकृत्वा जायन्सर्वेश्वरोयथापृच्छनोपहसति तथाभजनांश्रम

देव्याश्चाशोकवनमिवास्य देहः देव्यास्तर्जनभर्त्सनादिकारिणीभिः राक्षसीभिः स
हवास इवास्यापि कलत्रपुत्रमित्रादिभिः सहवासः ।३। देव्याः मारीचदर्शनमिवा
स्य विषयदर्शनं ।४। देव्याः श्रीहनुमद्दर्शनमिवास्याचार्यदर्शनं ।५। देव्याः तदुक्त
श्रीरामगुणादिर्वास्य श्रीरामायणश्रीभागवतश्रीभारतादिग्रन्थश्रीभाष्यादिग्रन्थद्रावि
डग्रन्थश्रवणं ।६। देव्याः तद्दत्तश्रीराममुद्रिकाऽऽगमनकथैवास्याप्याचार्योक्तगुरुपरंप
राकथनं ।७। देव्याः श्रीहनुमद्दत्तश्रीमुद्रिकेव तस्मैचाचार्यदत्तश्रीमदष्टाक्षरम् ।८।
देव्याः श्रीविभीषणधर्मपत्नी सरमा त्रिजटा च संभाषणसख्यौ यथा तथैवास्य श्रीवैष्ण
वाः सहायाः ।९। विरोधिनो रावणादीन्निरस्य स्वामी देवीं समाहृत्य यथानीतवान् तथै
वास्य विरोधिनं प्रकृतिसंबंधं त्याजयित्वा स्वामी परमपदं प्रापयति एतादशावातो ।१०।
अनुष्ठानपर्यन्तं येषु तिष्ठन्ति तेषां शरीरावसानपर्यन्तं निरपायं स्थित्वा श्रियः पत्युः श्रीपा
दयुगलमेव प्राप्नुवन्तीति । एकमाचार्यस्थित्यो रेकस्मिन् ज्ञानाधिक्ये सति अपरं बंधमा सं

तथा हि

आतिथ्यं

स्थिरमनसां दुस्कर एव खल्वध्यवसायः ॥ ॥ अभ्यासेन तु दुष्करो न भवति यः कश्चित्तु
नः ॥ अभ्यासेनैव हस्तिनमप्युद्धृतवानिति वार्त्तास्ति खलु श्रीरंग श्रीवेंकटाचल श्रीकांची
प्रमुख प्रसिद्ध भगवत्क्षेत्रेषु नित्यवासं कृत्वाऽभियुक्ताः सन्तः श्रीवैष्णवाः भूयशोयथाश्रु
तं तिनथा मानतं कृत्वा वा अर्थोपकारेण वा शेषवृत्त्या वाऽनुवृत्तिश्च ॥ ५ ॥ आचार्यकृता
न्महितस्य विशेषो यथा दृश्यते तथा पुत्रेषु च कलत्रार्थमित्रदेहादिषु अनिष्टशक्तिमकृत्वा
तत्संबंधविनाप्रवर्त्तनं च ॥ ६ ॥ भगवद्भागवतकैंकर्यैकप्रत्यंतरतत्परस्य सतः संसारेऽनित्यनाम
नुसंदधतः तेनास्य तत्संबंधपरित्यागः यतो नित्यप्रियतमस्य सर्वविधबंधोः श्रियः पत्युः श्रीमत्पा
दारविंदयुगलस्य सदानुसंधानं च ॥ ७ ॥ एतेद्गाथाः जपन्ति स्थानं कदालमधुलपाडानुआ
चार्याणां वार्त्ता ॥ श्रीवैष्णवस्य संसारे स्थितिरीदृशीति श्रीजानक्याऽशोकवनस्थितादर्शयामा
सतद्यथा ॥ श्रीजानकी यथा श्रीलक्ष्मणविषये तथाविधाज्ञापितवाक्येन स्वामिनः श्रीपादयुग
लात् दूरीकृता तथैव चेतनोपि तदीयापचारेण स्वामिनः श्रीपादयुगलात् दूरीकृतो भवति १

५२

६

रिसंपत्तेः कारणमिति करोति । एकांती हत्यं लोकसंपादनयाकर्त्तव्यमिति करोति । परमै
कांती कृत्यं कृपया करोति । श्रीवैष्णवकैंकर्य्यसाधनमिति करोति । एकांती कैंकर्य्यका
लस्य पार्थमिति करोति । परमैकांती कैंकर्य्यं रागातः प्राप्तमेव करोति । स तु चतुर्विधाहं
काररहितः । चतुर्विधाहंकारस्तु देहाहंकारः स्वरूपाहंकारश्च उपायाहंकार उपेया
हंकारश्च तत्र देहाहंकारः देहोहमिति देहानुबंधिपदार्थेषु ममता च देहात्मेनानुभवे पुरु
षार्थबुद्धिश्च एतत्सर्वनिवृत्तिर्देहाहंकार राहित्यं । स्वरूपाहंकारो नाम । देहमनादृत्य
स्वरूपानुशरणे स्वरूपमादृत्य गी [illegible] परस्वरूपे नंतपरस्वरूपेण मम
त्वस्य स्वस्वरूपप्रकाशनं तेद्राहित्यं तु भगवत्स्व कार इति स्थितिः
उपायाहंकारो नाम वयं श्रियः पत्युः कैंकर्य्यं कुर्म इति न त्रि
वृत्तिः स्वहस्ताभ्यां स्वकेशानां संस्कारेणान्योन्यमुपकारस्य नितिर्यथा न मन्तव्या ।

६

कृत्वाद्यभिमानः ५ साधनान्तरनिवृत्तिः ६ प्रयोजनान्तरनिवृत्तिश्च ५

त्रं निवृत्तिं न लक्षयामीति चेन्न पापस्याधीनत्वात् । पापस्यादयेऽप्याचार्याणां समाश्रयणं
युज्यते वेति चेत्पापस्यापि त्रैविध्यादुपपद्यत एव । एकस्याः प्राप्तिस्त्रयः प्रतिबंधकत्रयमि
व । तद्यथा । पाणिग्रहणं यथा न भवति तथाविधमेकं प्रतिबंधकं । भर्त्रा संश्लेषो येन
न भवति तदेकं पुत्रो येन न संभवति तदेकं इदं पूर्वक्रमेण यथा न स्पृशति तथैवाधिकारि
णोपि समर्पणविरोधित्रयः साधनविरोधित्रयः प्राप्यविरोधित्रयश्चेति प्रतिबंधकत्रै
यं तेषामपि पूर्वक्रमेण भवितव्यः इति कृत्वा श्रीवैष्णवः एकान्ती परमैकान्ती चेति त्रयोधि
कारिणः । तत्र श्रीवैष्णवो नाम देवतान्तरनिवृत्तिपूर्वकं भगवद्भागवतशेषत्वज्ञानं लब्ध्वा
स्थितः । एकान्ती साधनान्तरनिवृत्तिपूर्वकं सिद्धसाधनं स्वीकृत्य स्थितः । परमैकान्ती प्रयो
जनान्तरनिवृत्तिपूर्वकं परमप्राप्यकं चैव लब्ध्वा स्थितः । श्रीवैष्णवः अकृत्यानि पापानीति
कृत्वा त्यजति । एकान्ती अकृत्यानि स्वरूपहानिकराणीति कृत्वा त्यजति । परमैकान्ती अ
कृत्यानि रुच्यभावात्त्यजति [illegible] नायेन निवृत्तिर्वस्तु । श्रीवैष्णवः कृत्यमधिका

१ ये सक्तमित्रमाचार्यो परेशोपि प्रकृतिसहवासदोषदूषिते मुमुक्षुहृदये न स
ज्जति श्रीविभीषणः श्रियःपत्युः श्रीपादयुगलसमाश्रयणं चिकीर्षुः सन्बंध
नामेघनीचे रावणेन सचिवैः सह इति श्रीमत्सुग्रीवरामोक्तवाक्यश्रवणादेव हृष्टः
सन्स्थितः तथा मुमुक्षुरपि येन केनचिद्ज्ञानाधिकेन सम्मुक्तं निष्ठुरभाषणमपि श्रु
त्वा प्रीतः सन्नेव स्थातुं योग्यः श्रीविभीषणः स्वामी श्रीपादसमाश्रयणार्थं परित्य
क्ता मया लंका मित्राणि च धनानि च इति परिग्रहं त्यक्त्वागत एव मुमुक्षुरपि नागव
द्विपदकथनं त्र निकुलदेशान्हित्वा गन्तुं योग्यः श्रीविभीषणः स्वामी श्रीपादसमाश्रय
णवेलायां खे एव स्थितः इति एवं निरालंबत्वेन स्थितः तथैव मुमुक्षुरपि स्वामीपा
दसमाश्रयणादशायां उपायान्तरशून्य एव तिष्ठेत् श्रीविभीषणः स्वामी श्रीपादस
माश्रयणार्थं त्यक्त्वा पुत्रांश्च दारांश्च राघवं शरणं गतः इत्यनुपादेयवस्तूनि विसृज्या
गतः तथैव मुमुक्षुरपि स्वामी श्रीपादसमाश्रयणार्थं विरोधिजनान् परित्यक्तुं योग्यः श्री

ये न जानन्त्यात्मानः ये भवंति श्रियः पातु वैकुंठे नुस्थितान्दृष्ट्वा स्थिताः
उपेयाहंकारस्तु अहं परमपुरुषस्य परिजनो भवामीति तद्दृष्टिं त्वं तु स्वदोषानुसंधानं
कुर्वन्स्थितः बहुः अविद्याधीनः शास्त्रीयः पुण्यपापाधीनः केवलः स्वरूपाधीनः
मुमुक्षुर्भगवदधीनः प्रपन्नः आचार्याधीनः प्रपत्तिनिष्ठस्तदीयाधीनः तत्रैव प्रपन्न
त्वेनाम स्तु आचार्यः यथा मनुनेन तथैव कुर्यादिति स्थितिः दावानलमध्ये स्थिताः
कादिशीका मृगाइव तापत्रयात्मक संसारभयभीताः संतो मुमुक्षवः आचार्यपुरस्
कारं कृत्वा प्रपत्तिमनुष्ठातुं योग्याः इमं तत्प्रकारं कथयति यथा विभीषणो रावणं
प्रति त्वदीयमं दाशरथाय मे यलीति श्रीरामचंद्रस्य पदारविंद युगले सीतां समर्प
येत्युक्तवान् तथैवाचार्योपि मुमुक्षुं स्वात्मानं श्रियः पत्युः श्री पादारविंद युगले
समर्पयेति वदति विभीषणेनैवमुक्तं वाक्यं महत्त्वाद्देवानयदोषदृष्टिन तद्दूर

परमिति। केदारखंडानां चार्वाणां वार्ता दिव्यदेशे स्थिरां सेवांकृत नवं नो श्री वैसवा
बन्धो नं विश्लेष भीरु स्थितो वदाचिद् गहुम परवशो विवादं कृत नवं तो नयोरेक
स्माचां विलुंगा रित्रआचार्याणां संनिधिं समागत्य स्वाभ्मान प्रतिकृतं तत्कारादि
कं विज्ञापयामास तत्र बहुत्वा सनिधिस्था। एवं विज्ञापनं कर्तुमुचितं वेति विज्ञापयामा
सुः तदानीमाचार्याः भवत्कथयं तु नाम क्रूर भटैः समेतो यमो पिपरिहरेत्युक्तवान् श्रीरपि
न कश्चित्तापराध्यतीत्युक्तवती श्रीपतिरपि न त्वजेयमिंकृतवान् परोक्षादद्युष्मासं
द्वंरेवितयाखिलं इत्युक्तवंतः एवं सति तेषां मध्ये भ्यानियानि तानि कथये तु मन्येके
संति इत्याज्ञापितवंतः स्वामी स्वविषयापचारं किं करोमीति भागवतापचारमपि चा
पल्येनागतं चेत्किं कर्तव्यमिति सहते ग्मसत्तापचारं बहुप्रकारं बहुप्रकारैरपि न स
हते सदाचार्यावलंबनेन तमपि सहते भनोदाहरणं भयिहूयानुवंधो भूतं संस्तु गावुद्यते
तव मन्त्रिनुस्तत्कृतं पापं देवतस्य प्रणश्यतु त्वयिभक्तिमतो हूयादघस्तत्संभवं चयन्त। त्व

विभीषणः स्वामीश्रीपादसमाश्रयणार्थं । आजगाम मुहूर्तेन यत्र रामः सलक्ष्मणः इति
स्वामिनः श्रीपादपद्मनिकटदेशमेव समाहूय समागतेः । एवं मुमुक्षुरपि स्वामिनोऽभि
मतो देश एव स्वस्य सर्वमित्यवलंब्य स्थानुयोग्यः । श्रीविभीषणानिवेदयंतमाहितिश्रं
आनयैनं हरिश्रेष्ठ दत्तमस्याभयं मयाद्दृत्वनेनरूपमेकं एवं संपन्नः । एवं सत्यपित्वे
न सहागतानां मंत्रिणां हानिलाभौ समौ जातौ । एवं मुमुक्षोरपि स्वामिनः श्रीपादार
विंदयुगले आचार्यकृतोपपत्तिर्वसमग्रफलदाने पर्याप्ता । ननु सुग्रीववचोनि
शम्यनद्दूरीश्वरेणाभिहितेनेश्वरः । विभीषणोनामुजगाम संगमं पत्रिराजेन यथा
पुरंदरः । इति महाराजं पुरस्कारं कृत्वा स्वामी श्रीविभीषणं स्वीकृत्य यथा कृपामकरो
त् तथा मुमुक्षुमपि आचार्यपुरस्कारं कृत्वा श्रियः पतिः स्वीकृत्य कृपां करोति । एवं मु
कुलक्षणः प्रपन्नः संसारमंडले एवं स्थानुयोग्य इति जानकीरावणे भवनात् शोकवने
स्थित्वा दर्शयामास । एतेरगाथाः मनुष्यानप्यवंतयस्मिनृश्राविश्वेवतिष्ठंति तेत्रापिपरमं

स्या

न१

वी.मा.
५

२

मासनसन्नामजर्जैः स्वानुपयुक्तः दत्तायां करणकलेवरादिकं दत्तं न गृहीत्वा व्य
भिचारं यथा न करोमि तथा स्वामिनैव क्माचार्येणास्वीकारितः त्सनामादि
कं त्वापयसि विनयभ्राव एवं परनिंदां च यथा जिह्वया वर्तनं न यथा जिह्वया दु
षोच्चारणं कारयसि एवं स्वामिनाकृतस्याऽधिकस्य जन्मपरंपरां लब्धापि दु
ष्टोच्चारणे क्रियमाणेऽपि ज्ञानी कारोम विश्वासिता एवं सति एनदाधिक्यमधः कृ
त्य पृष्ठकृतैरुपरि तिष्ठति स्वामिनः श्रीम श्रितं यद्दिशरीरं भक्तं कर्म दूरीकृ
त्याधिकारसंपत्तौ न्म द्वेष्मादिकं दानवं। न्मा चापि विल्लंगारिन्माचार्याणि ना
तौ। तेषामेव न्मनन्यकृपोजनो न भवामीति कृत्वा मुखोल्लासपात्रं न भवामि
श्चपत्रौ न भवामीति कृत्वा कृपापात्रं न भवामि मत्कृतोऽपराधः क्षमादिकोन
भवतीति कृत्वा दमापात्रं भक्तिन भवामि उपकारकोऽयमिति संतोषं कृतवान

त्संसारदेतत्रमोसप्रयत्नेन मुच्येत भक्तिमानाइति विष्णुपुराणे तस्मादर्थनाइतिश्रा
र्थितः सन्नत्रमते । कस्यचित् भागवतस्येव स्वस्वरूपं । भागवतत्वसाउपायः भाग
वतकैंकर्यमुपेयं । भागवतापचारः द्विविधः औपाधिकभागवतविषये एको
पिनिरुपाधिकभागवतविषये द्वितीयोपि स्थिरोपचारः । देहो जनसंमर्दं न सहते । स्वरू
पं एकांतं न सहते । भगवद्विषयस्य प्रकाशो जनसंमर्दे स्यादिति तु । तद्विषयसांध
कारमेकांतं चापेक्षते । भगवदनुभवतः विषयानुभवेन्वयो नास्ति । एषोर्थः एव पूर्वा
चार्यैः पराङ्कुशादिभिर्बहुप्रदेशेषूक्तः । येषं चित्तं विषयप्रवणस्य भगवद्विषये
न्वयो नास्ति । भगवदनुरक्तेंद्रियवतः विषयांतरानुभवेन्वयो नास्तीति निरु
क्तेषोपिरां जियंमारिवार्ता । श्रीवैसनवस्य विषयप्रावण्यं स्वात्मानं निरीक्ष्यापि दु
तो न भवति । संबंधविचारोपि युक्तो न भवतीत्याज्ञापयंति । आभासं नंतया

नार्मनीधत्वात्त्र नन्यत्र योजनान्त्र विश्वसहीरेषु पारदस्याः नन्यत्र योजनान्
विनाशयितुं त्रयोजन पराः संतः स्थिताश्च त्याज्याः । पतिव्रतायाः मातृपितृवर्गः
भर्तुर्वर्जनीया वैधवाश्च स्वसदृशाः पतिव्रताश्च त्रय उपास्याः । प्रपन्नस्या
चार्यश्री वैष्णवसह ब्रह्मचारिणः । एकः श्रीवैष्णवः श्रीवैष्णवेन सह वासं यदा
कर्तुमिच्छति तदा तस्य गुणदोषनिरूपणसमयेस्तु तिरपि दोषाय दूषणा
मपि दोषाय भवति । गंतुं चावलंबनं वा तुं च पूर्वेषामेव । त्याज्य विषयाः केचन उ
दासीन विषयाः अनुग्रह विषयाः । अनुभव विषयाश्च ते तु नास्तिकाः आस्ति
कनास्तिकाः नास्तिकआस्तिकाः आस्तिकाश्च अंतर्बहिर विशेषेण यस्य पर
लोकश्रद्धा नास्ति स तु नास्तिकः । बहिरास्तिक इव यस्त्वंतर्नास्तिकः स तु द्वितो
यः बहिर्नास्तिक इव अंतरास्तिकः तृतीयः । अंतर्बहिरविशेषेण श्रद्धावा

सि॥ अनन्यदृष्टिरूपो करोसि अपूर्व वर्जनीयमिति महसे॥ श्रीवैष्णवैर्वैष्णवाय यदा स्तू
यते न देवमनुसंधानं आचार्यवैभवमेवंनिष्ठतिरवलिति॥ राजकंचनस्पृष्टिनतिकु
त्यमस्ति वेति च एतेषां मानपैवर्एवंविधगुणाः संभविष्यंनीति॥ लोके विसृज्यमा
नामणां प्रपन्नेन लोके संलापः त्याज्यः एवं सति केन संलापः कर्तव्य इति चेत्
नारायणेनैव संलापः कर्तव्यः नारायणपरेण स्वहृदयेन वा॥ नारायणपरैर्वा नारा
यणपरत्वस्वरूपैर्भिर्वा॥ पतिव्रता यादृश मुमुक्षोः प्रपन्नस्य पंच त्याज्याः त्रय उपादे
याः॥ तद्यथा कन्यकावेश्या अपतनयश्च पतिं विसृज्यान्ये पुरुषमागाश्च पतिव्र
ताइव स्थितवारहस्से व्यभिचारिण्यश्च॥ एताः पंच पतिव्रतायाः त्याज्याः॥ मुमुक्षोः
संसारिणः देवान्तरपराः देवान्तराणां दर्शनं प्रापदर्शनान्तरगताश्चैवरूप

केवति॥

दासस्य हस्तावतंसवत् नंदनंदनः । तदा कथमेतदिति संनिधिस्थैर्विज्ञापने कृते
जन्मना ब्राह्मणोऽपि नैव स्थितो इत्यभिमानो भवतामस्ति खलु तथा विधर्म्म
रहिताः खल्वेते । भगवत्शेषत्वं भगवत्शेषवृत्तित्वं सर्वजनसाधारणं । भा
गवतशेषत्वं भागवतकैंकर्य्यं च परमैकांतिनामसाधारणं । भागवतवैभवकथ
नसमये केनचित् द्विष्टेन तेन भगवत्विषये कथिते । इदानीं स्वरूपकथनदशायां इ
दं सामान्यमिति । भाचाविल्लणारिअवदन् कैकेयी भगवदपचारपरापि
पुत्रव्याजेन परमभागवतेन स्नेहं कृत्वा सायुज्यं गता । चक्रवर्ती भगवत्स्नेहपरो
ऽपि मुक्तो न जातः । भागवत्प्रातिकूल्ये धर्मनिष्ठत्वात् । दशरथवसुदेवयोः पितृत्व
विशेषेऽपि वसुदेवोऽस्य पुत्रदानप्रतिज्ञायामपि अष्टमपुत्रं श्रीकृष्णं दाना
मेव चोक्त्वा प्रतिज्ञां विहायापि कंसं वंचयित्वा श्रीगोकुले नीतवान् । तो व

नास्तिकः ॥ एषामंविज्ञारिवार्त्तामुपुलयांडानमेलयालुल्लानुवैलवायक्कधिनावार्त्ता
चतुरस्त्रीरानुपहिरत्त्पश्रवर्तितमंतेतुआत्मापहारी विभूत्यापहारी गुणत्वापहा
रीपरत्वापहारी च ॥ आत्मापहारी नाम श्रीवत्सस्थलस्थितकौस्तुभापहारी ॥ नन्वि
ति चेत् ॥ आत्मानमपहृत्य स्वात्मसन्निधत्ते ॥ विभूत्यापहारी एकायनः क
थमिति चेन्मात्सरीनः गुणत्वापहारी मायावादी कथमिति चेन्निर्गुणं वदति ॥ प
रत्वापहारी रुद्रादिपरत्वमारोपितैः ॥ स्वरूपनाशकैः संगतिरनर्थाय ॥ स्वरूप
वर्द्धकैः संगतिरनर्थाय ॥ असत्संगतिरनर्थो नामुपरि सत्संगतिः सदापरत्वेन

सूरयः

तिज्ञाप्यार्थमाक्षिपर्यंता ॥ आचार्यविज्ञप्तिरिवार्त्ता ॥ श्रीरामानुजाचार्याः श्रीरंगना
थिकारमगाम्हतमे कल्याणमहोत्सवे कावेर्याः श्रीवैष्णवेभ्यस्तीर्थदापधि
त्वायदामार्गे समागच्छतः तदानीं र्थस्त्रीकान्यसमागतास्तैः पिल्लवरंगाविल्ल
द्वैपैकनिष्ठपरुषैः संगतिकार्यसरा रहस्यत्रयसारे जैसत्वत्रयनिर्णयः ३ ॥

तैः सरसतया प्रतिष्ठा॰ कथनं ए तेषां न्यूनत्वं येन कथयंति तन्मुखाच्छादनं वास्व
यंश्रोत्रे पिधायान्यतोगमनं वा ॥ श्रियः पत्युरालयद्वारि केनापि संस्कारापादकस्मा
रणानिरीक्षणादिरादि त्यच्च ॥ श्रियः पत्युरालये ऽपापन्नतयात्रा विषय ऽपराध
माचरेत् स्थितानवद्यमिति भीत्या स्थितिः ॥ एवंविधकालक्षेपणसंसारे स्थितस्य
श्रीवैष्णवस्योपास्याः श्रीवैष्णवास्तु नवविधाः ॥ ज्ञाननामरूपप्रधानाः सत्का
र्ययोग्याः ॥१॥ उच्चारणप्रधानाः ऽभिमानप्रधानाश्च सहवासयोग्याः ॥२॥ ज्ञानप्र
धानाः ऽनुष्ठानप्रधानाः ऽंगीकारप्रधानाः ऽआर्तिप्रधानाः ऽअभिनिवेशप्रधा
नाः ऽअभिरुचिप्रधानाश्च सदानुभवयोग्याः ॥ एतानंबिल्लजियंगारिवान्तो या
वनिज्ञाने उक्तैः सन्ति ऽआत्मानं वैष्णवं ज्ञात्वा स्यात् गुरुशकार्ये इति विल्लंगारिऽआ
चार्येणानंजियंडा हऽआचार्याः पृष्टा ऊचुः भगवद्भागवतविषयेयस्मिन्क

सुदेवस्य मुक्तिः भागवतशेषत्वैविधुरं भागवतशेषत्वं देहात्माभिमानं इत्यमं
गलमिति मधुलयांडानवार्ता ॥ अतीतद्विनानिपतितेऽनुतापः । आगामिकाल
स्यावृथाकरणं च खलु वैस्मवत्वं ॥ पिंगलादिवार्ता ॥ अपगतसंसारुच्चैः पर
मपदप्राप्तिसमुत्सुकस्य श्रीवैलक्षण्यवैहिता निर्देहे अरुचितस्तु वंधिनि स्नेह
रहित्यं ॥ देहहेतुं कृत्यसंतुष्ट्यद्विरस्नेहः लोकस्यानपकारः त्योचितवर्तनसम्मू
नतायथानभवतितथास्थितिः ॥ आत्मार्थं प्रकाशीकृत्यनिगूहत्नुमहानुभावे
षुएकप्रकाररुचिः छिन्नशिरस्कस्य ब्राह्मणांतं छित्वा पातकेन कपालं विभ्रतः
एतयोर्वंशोस्थितानां चंद्रसूर्यादीनां शरणमागत्वास्थितिः एतान् श्रियः पत्युः श
रीरभूतान् दासान्मत्वासमाहृत्यास्थितिः श्रियः पत्युरुचितं कैंकर्यं करणं श्रि
यः पतेः सर्वस्वमिति शरणागतानां सर्वस्य प्राणांश्च सहायांश्च मत्वा स्थितिः ए

भंदत्तमिति । अनादरेणाऽस्थित्वा कृतं न स्यादास्थितिः । पुरुषं महोदारं मत्वा य
थादरं करोति तथैव येन केन चित्सुकृतेनापि निहितं मां स्वामी निर्हेतुकेन क
टाक्षेण रक्षितवानिति । कृतज्ञस्य संतोऽधिकारिणः केनचिदभिसंधिना निर्हेतु
क एव कटाक्षः । तस्य यादृच्छिकसुकृतस्य हेतुः श्रियः पत्युः सौहार्दं तस्मिन्सर्वा
त्मा विषये सर्वदा सत्यपि यस्य कस्यचिदेकस्य यदा कदाचिदेकदा यादृच्छिकसुकृ
तागमः कथमिति चेत् जपाकुसुमच्छायापदार्थेषु सर्वेषु पतितः सन्स्वच्छस्फटिके
यथा प्रतिफलति तथैवास्मिन्नधिकारिणि सौहार्दं फलतीति । श्रीवेंकटेश्वराचा
र्याणां वार्ता । श्रीवैष्णवं नाम रूपप्राधान्यं चिन्हप्राधान्यं क्रियाप्राधान्यं संबंधवि
शेषप्राधान्यं । ध्यानप्राधान्यं एतानि सर्वाण्यपि न भवंति । भावप्राधान्यमेव भा
वो नाम श्रियः पत्युः श्रीपादतीर्थप्रसादविषये परमप्रेम । चतुर्भिर्जनैर्ज्ञातं वे

स्मिंश्चित्सुषुप्ते हृदये स्वहृदयमाऽविलं स्याद्यदीश्वरसंबंधज्ञानेन जातं खलु श्री
वैष्णवत्वं नाम तत्त्वज्ञाननिष्ठत्वं तत्त्वाऽवाप्यं विषयाकारलभ्यं संजनितं संमया
ज्ञातव्यमित्यभिनिवेशातिशयपूर्वकभजनेकालभ्यं तस्मिंस्तन्मतं भगवत्पदेषु
तत्कारणं भगवत्कटाक्षः तस्य हेतुः असंसारी चेतनस्याऽनादिकाले भगी
वद्विमुखवर्तित्वात् तत्कटाक्षानुरूपसुकृतं किंचिदपि नास्तीति कृत्वा भगवत
कटाक्षस्य निर्हेतुकत्वमेव तथा चेदीश्वरस्य वैषम्यनैर्घृण्ये भवतः नो छे
ति चेदः स्य चेतनस्य स्वयमज्ञानत एवावाप्यपरिवर्जितमुक्तानि यानि कानिचि
त्सुकृतानि निमित्तीकृत्य एतद्विषये कटाक्षं वर्षतीत्यनेन वैषम्यनैर्घृण्ये न भवतः
एवं यस्मिन्कस्मिन्सुकृते हेतौ सति तस्य निर्हेतुकत्वं कथमिति चेत् प्रमादेन
स्वयं पातितमस्पृश्यत्मना स्वयं दृष्टमानी [illegible] पुरुषं प्रति [illegible] मस्म

१४ 14

ना०मा० १४

मीरत्नक इति स्थितिश्च न स्वरूपं रत्नोऽहमिति स्थितिश्च न स्वरूपं रत्नक इति निश्
तिश्चेत् । अनन्यार्हशेषत्वस्य उचितेन भवति । न तु रत्नोऽहमिति निरतिशयत्वस्वा
मिसंबंधस्य उचितेन भवति । स्वामी सापेक्षकः आचार्यः प्रपन्नाश्च सापेक्षा निर
पेक्षाः स्वामी कांश्चिज्जनान् आगच्छेति वदति । कांश्चिज्जनान् अनुगच्छेति
वदति । कांश्चिज्जनान् अहमेवागच्छामि इति वदति । ते क इति चेत् कर्मनिष्ठा नु कर्म
णि तीरं संति आगच्छेति वदति । प्रयोजनान्तरपराननु फलं दत्त्वा गच्छेति वदति
अनन्यप्रयोजनान् अहमेवागच्छामि इति वदति । अस्मिन् शेषे के चनानन्यप्रयोजनाः
निष्ठन्तीति जानीमो वसंति चेद् नैव जानीमः । तत्कथमिति चेत् आपन्नश्च प्राप्य
संतिर्थ श्रीश्रियःपतिः स्वामप्यर्थेन इत्युक्ते चेद्धि श्वस्पस्यानुयोग्यानसंति चेत् तत् ज्ञानं भवं
ति । भवंति चेद्याज्ञवल्क्यं कर्यैवरसं भजंति । एतद्धि श्वासह नज्ञाना कैंकर्यारसंति

सर्वत्वं न भवति । नारायणेन ज्ञातमेव वैष्णवत्वं । देशो वैष्णवशक्तियथाल्पजाति । न
गरं वैष्णवः यथा स्वीकरोति तथा वक्ष्यामि तथं । देशो नाम संसारः नगरं परमपदं दिव्य
देशो ज्ञानाधिका वैष्णवाश्च । श्रीमन्मद्रांकुशादिदिव्यप्रबंधेष्वन्वयो येषामस्ति ता
नेव श्रीवैष्णवान् ज्ञात्वा मत्वा स्थातुं योग्यः । नदीयानामाचार्याणां ऽप्रपासुलग्ने
धेषु ऽनन्वयो येषामस्ति तानेव स्वसत्तां मत्वा स्थातुं योग्यः । एतस्मिन्नुभयत्रान्वयि
न एव श्रीवैष्णवाः ऽअन्ये वैष्णवाद्यभिनिवेशेन मता वपाः । एवां श्रीवैष्णवाद्यभिनामक
थमिति चेत् श्रीमत्परमत्वात् श्रीमत्पदज्ञातत्वाच्च श्रीवैष्णवाद्यभिनिरूपयंति प
रियइत्यपि लिंगारिवातौ । स्वरूपज्ञानोदयानंतरं शरीरविश्लेषपर्यंतं महाभयं महा
विश्वासश्चानुवर्तते । तत्र हेतुः स्वात्मानं यदा पश्यति तदा भयं प्राप्नोति गुरुं प्राप्य प्रव
सायः विरोधिनो भयं उद्देश्यगौरवं । उपकारकत्वज्ञातात् तारके प्रतिपत्तिश्चेत्यशेषस्वा

शा टी

अधिकारिणां दुर्लभमनयाविग्रहे श्वेति मानं धत्ते। अधिकारं प्राप्य समीपमागता
अपि प्रयोजनान्तरपरतया स्थिताश्चेतनाः तालुगतकेशसंश्लिष्टान्नकवलमिव
भवंति एतत्कारणेन पुष्पाञ्जिइक्षनन्तिष्ठतीति न जिघंसा आचार्यैरुक्तमिति न
विल्लिगारिवोत्तं सम्प्रयस्तमंडूकातनादं श्रुत्वा अल्पानन्यमाचोर्व्यामोहं गताः इति वे
कटेश्वरा आचार्याउपदिष्टवन्तस्तस्मात्परदुःखासहत्वं परसमृद्ध्येकप्रयोजनत्वं
श्रीवैष्णवस्वभाव इति त्वन्त्रियमाणेन नमस्कारः संतोषेणैव कर्त्तव्यः स्वस्मिन्क्रि
यमाणस्य नमस्कारस्य सत्त्वेन विद्यमानस्यान्तव्यं स्वसत्तायाः प्रकाशनं परनम
स्कारस्वीकृत्यस्यानुसमर्थत्वं स्वरूपेपरिज्ञानं उपायाध्यवसायश्च अधिका
रिकृत्यमिति आत्मा विल्लिगारिवोत्तं संसारिणां ह्यर्थस्वरूपमात्मानपशेषत
मात्विकानां तु तनच्छ तथा नपश्येपत्। अज्ञोलोकमध्येऽपि स्थितापि विलक्षण
ज्ञानस्याविच्छेदेन भवति तथावस्थाने उपाधिबलेनाभिधत्वोयथावस्थाने

चेत्तथापि रागद्वेषपारवश्येन भगवतः कैंकर्यभावरूपे सत्यप्याचार्यस्य देह
यात्रां दृष्ट्वा स्वधीदरा भवंति । तत्राप्यादरे सत्यपि स्वात्मनो विशुद्धा मन्यंते इत्ये
तावता कुकरगडिरेयंगारिवार्ता । तस्माद्भगवद्गुणानां वक्तुमप्यधिकारो ऽत्र
नास्ति नेति इति कंदलयोऽतन् श्री भट्टारक श्रीनिश्री कोपग्रहेत्तरीत्वा । एवं उ
पदिष्टवंतः । श्रीमद्यामुनाचार्याः कदाचित् श्रियः पत्युः संदर्शनेच्छया गर्भालयं
गंतुमुद्यम्यांतर एवास्त्रीत्मनन्तत्रभोजनेव केते उपायनद्रव्यमंथिं धृत्वा ऽग्रम
नीपुरद्वारे ऽवमंता स्थिता । तां दृष्ट्वा वहिरागत्य स्थित्वा सन्निधिस्थान्वैष्णवान्
प्रतिप्रयोजनांतरपरागता इत्याज्ञापयन्नु स्वामिनां एवमुक्ते निदानं किमिति
वैष्णवैर्विज्ञापितः सन् श्रियः पत्युः सन्निधावपि प्रयोजनांतरपरैः संसर्गो ऽधिका
रविरोधं फलविरोधं च जनयतीत्याज्ञापितवंतः । भवंतारः को हेतुरिति श्रीवै
ष्णवैः पृष्टः सन् [illegible] इति । तन्कथमिति चेन्

२

लेवनेचमध्यमगमदं गारवलाकावमुरितः स्फुरंतीक्षुत्तडिल्लुनसा मवस्यायां
श्रीमन्नामोच्चारणमहत्त्वावस्थानं यन्नत्तनग्रपत्नलहाणमित्युक्तवंतः वै
लवलंनाम वैषम्यज्ञानेन नामतद्विशेषपरिज्ञानं तथा गुरूणां मद्गुरोश्च
मंत्राणां मंत्रत्वस्य च देवतानां नराणां परदेवतायाश्च देहस्यात्मनश्च उपास
कस्य प्रपन्नस्य च साधनानां नराणां सिद्धसाधनस्य च परतत्वस्य चाविनाशस्य च
संसारिणां वैस्त्वस्य चात्मात्मनः ईश्वरस्य च पुरुषार्थानां नराणां परमपुरुषार्थस्य
च विशेषं कथयंति गुरवो नाम संसारप्रवर्तकाः संतो ज्ञानप्रदाश्च सद्गुरुस्तान्नि
वर्तकः परज्ञानप्रदश्च मंत्राणां नराणि प्रयोजनानि रवप्रवर्तकानि स्याने प्रदानि
च मंत्रत्वं पुरुषार्थप्रदं पारलौक्यप्रदं च देवतानां नराणि प्रज्ञानि अप्रज्ञानि
परदेवता सर्वज्ञः सर्वशक्तिश्च देहो जडः परिणामी आत्मा ज्ञानीनंदमयएकः

वा२

तथैव । आचार्यविषयाकारो वा श्रीवैष्णवाङ्गीकारो वा भगवत्भागवतकैङ्क-
र्यैस्त्वनुसंधानं वा संसारनिवृत्तेः परमपदप्राप्तेश्च हेतुः कः इति चेत् । एतत्सर्वं न भवति
ईश्वरकृपापरपर्यायोपायमेव । परित्यज्याख्यातिः तर्हि किमिति चेत् । आचार्यविष-
याकारः अज्ञानेपरित्याज्यत्वेन कारयति । श्रीवैष्णवाङ्गीकारः स तत्संबन्धकारय-

द्वयान

ति । भगवद्भागवतकैङ्कर्यं संधानं च कालक्षेपार्थं स्वस्वरूपत्वेन अन्ये न

५

कारयितव्यं संसारनिवृत्तीनिष्पत्तस्वामिनः श्रियःपतेः अनन्तापारभूतस्यैवोपाय-
त्विः अन्ये न कारयितव्याः । ईतीमुहस्य चेतनस्य शेषवत्त्वेन अनन्यना अन्येनाभावित-
अतिकृपशोकयोरपि स्वरूपस्वभावात्रिमत्त्वात् । श्रीमहारकैः प्रपन्नानं
स्तुत्यैः प्रपन्नलक्षणं किं इति पृष्टवान् तच्छ्रुत्वा नेचैरव्याघ्रादिसंकुलारण्ये
निशाथे पुरस्य पदार्थमपि अदर्शयित्वा तिष्ठति गाढान्धकारे सिञ्चनपातसंकु-

ना०म०
११

मोक्षद्वारादेवास्य स्थितिः । बंधहानिर्नो भवेद्धसंकोचं चैतन्यदेभ्यः कथ्यते इति यत् । आ
विलं जलं एकस्मिन् पात्रे निधाय कतकफलसंघर्षणे कृते सति पंकमधः कृत्वा वि
शदं सत् जलमुपरि तिष्ठति । एवमेवाज्ञानमिश्रः सन् शरीरे स्थित आत्मा आचार्ये
ण महोपकारेण श्रीमच्छास्त्ररूपकतकफलसंघर्षणे कृते सति । अज्ञानपंकमधः कृत्वा
ज्ञानरूपः सन् प्रकाशते विशदजलं पात्रान्तरप्रवेशपर्यंतं यस्य कस्यापि हस्तसञ्चाल
नादाविलं भवतीति भीत्या यथा सुरक्षितं कुर्वंति तथैवैनमात्मानमपि स्वरूपज्ञानवं
तं दृष्ट्वा पुनः पुनरपि पाज्याऽवस्थितिरिति यत्तत्स्वरूपमिति । आचार्यविल्हणगारविंतो । अना
दिकर्मप्रवाहे चतुर्विधशरीराणि प्रदिश्य चतुर्दशभवनेषु कारिदशीकतयासंचरं
तं चेतनं वा सद्गुरुः पतिस्त्रिविधशरीराणि त्याजयित्वा स्वचरणारविंद
प्राप्त्यर्थं मनुष्यजन्म प्रापयतीति स चेतनः कारणत्रयेण कालत्रयैकमंत्रयान्वि

17

स्वतःसि
द्धं

रूपश्च। उपासकस्य उपासनाप्रकारज्ञानमनुष्ठानं च न तथा स्मर्त्तव्य सततं विष्णुर्वि
स्मर्त्तव्यो न जातुचिदिति। प्रपन्नस्य आनुकूल्यस्य संकल्पः प्रातिकूल्यस्य वर्जनं
अपराधानामालयः। अकिंचनोहमिति निमतिश्च। साधनान्तरं दुःसाध्यं सापायं
च सिद्धसाधनं निरपायं च परतन्त्रस्य तन्त्रं दुर्लभं च। अर्चावतारोर्चेन सुलभः आ
श्रितपराधीनश्च संसारिणो नाचारप्रवर्त्तकाः दुर्मानग्रस्ताश्च। श्रीवैष्णवाः आ
चारप्रवर्त्तकाः दुर्माननिवर्त्तकाश्च। आत्मा व्याप्यः शेषश्च ईश्वरो व्यापकः शेषी च
पुरुषार्थान्तराणि अल्पान्यस्थिराणि च। परमपुरुषार्थो नित्यो निरतिशयश्चेश्वरदे
वस्य ज्ञानं। एकस्याः स्त्रियः पातिव्रत्यहानिः स्त्रीत्वहानिर्बन्धुहानिरिति त्रिहानि
यथानर्थे वाधिकारिणोपि। अस्या अन्यविषयपरिहार्यं एतस्याप्यन्यविषयंप
रिहार्यं। अस्याः पातिव्रत्यहानिर्नाम इष्टार्थमितरानुवर्त्तनं स्त्रीत्वहानिर्नाम इष्ट

ग्रहमध्यपराधनामालयोर्किंचनोगतिः स्वमेवोपायमतोमेनुतिप्रष्टोनामतिः १ ~

नत्रयं भूता० वर्त्तकालाः गुणत्रयं सत्वरजस्तमांसि आसात्रयं धनजीवलोकाः
अपरात्रयं भागवद्भागवतासह्यापचाराः इषणात्रयं अर्थदारपुत्रैषणाः तत्वत्रयं
चिदचिदीश्वराः तापत्रयं प्रसिद्धं देवतात्रयं ब्रह्मरुद्रेंद्राः मं[illegible] पीत्रयं श्रीमूली
ला आत्मात्रयं नित्यमुक्तबद्धाः त्रिविधपरिच्छेदः देशकालवस्तुजाः कारण
त्रयं निमित्तोपादानसहकारीणि विरोधित्रयं अन्यशेषत्वं स्वातंत्र्यदेहात्माभि
मानाः सुखत्रयं पारिच्छिकानुषंगिकप्रासंगिकानि आनुकूल्यत्रयं अहेत्वा
भिमुख्यसत्वं भाषणानि अनुवर्त्तनत्रयं शरीरमर्थं प्राणांश्च सद्गुरुभ्यो निवेदयेत्
इत्येवमुक्तरूपं अधिकारत्रयं बहुश्रुतानां वृद्धानां ब्राह्मणानामुपासनमि
त्येवमुक्तरूपं मंत्रत्रयं प्रमाणप्रमेयप्रमातृणामभिमतामंत्राः अनन्यार्हशेष
त्वं अनन्यशरीरत्वमनन्यभोग्यत्वं ज्ञानत्रयं स्वज्ञानं प्रापकज्ञानं प्राप्यज्ञानं

अकार
त्रयं २

तः सन्ऽस चित्त्रय विलक्षणोपि गुणत्रय विलक्षणोपि । आसात्रयेण परिभूतः स
त्त्ऽपराधत्रय मार्ष्णीयद्वेषणात्रयमुक्तः तत्त्व त्रयमज्ञात्वा तापत्रयमनुभवन्निह
ति । एवंविधस्समये देवतान्तरत्रयस्त्रगी । महिषीत्रयवल्लभः आत्मत्रयस्वामी । त्रि
विधपरिच्छेदरहितः त्रिविधकारणवस्तुभूतः श्रियः पतिरनेकदाविषयीकृ
त्य विरोधित्रयं परित्याज्येत्यामुक्त्वा त्रयभोगकारणानुकूलं कृत्वा । आनुकूल्यत्र
यं मध्येनियोज्यानुवर्तनत्रयाधिकारिणं कृत्वा धिकारत्रयसंपन्नाचार्येणोपदि
वे
ष्टमंत्रत्रयेण निर्मलीकृतपरत्रये गुणवैरूप्यज्ञानत्रये सुस्थिरं कृत्वा शंकात्रयं दूरीकृ
त्यऽऽकारत्रयाच्छादिनं कृत्वा पत्रयपरिज्ञानं कृत्वा लोकत्रयोपेतां जनयित्वा
पदत्रयं नीत्वा सम्पत्रयसंपत्तिं कृत्वा स्तुतित्रयमुक्तं भोगं भोजयति । तत्र करणत्रयं
मनो वाक्कायाः कालत्रयं भूतभविष्यद्वर्तमानाः । कर्मत्रयं कारणत्रयार्जितं आवि

णाइत्वस्तापरार्धेनग्रतो निधाय निषेत्‌। श्री आचार्यसंनिधौ श्रीजनकस्य सन्नि
धिं प्राप्तः श्रीशुकब्रह्मचारिणः तत्त्वस्याग्रतः पुरतो निधाय निषेत्‌। श्रीभगवत
संनिधौ श्रीवानरोत्तमः सेनाचरमसान्निध्ये स्थितः श्रीहनुमानिव तत्त्वस्य नैवतत्त्वं पुर
तो निधाय निषेत्‌। संसारिणां संनिधौ अशोकवृक्षस्याधः स्थितासीनेव तत्त्वसेका
किं तत्त्वं पुरतो निधाय निषेत्‌॥ तत्त्वविवरणे भगवतः स्थितनाम विशेषणस्य स्थिति
रेवमित्याह॥ ज्ञानानंदक तत्त्वं नमो नमोऽच्छेद्यः अदाह्यः अक्लेद्यः अशोष्यः अ
व्यक्तः अचिंत्यः अहर निर्मलः निर्जरः नित्यः अविद्यातः ज्ञानमयः आनंदमयः
शांतः भगवन्नियाम्यः भगवदाधारः भगवदात्मकः भगवद्दासभूतः भगवच्छरी
रभूतः। प्रतिशरीरं भिन्नः निर्गुणः प्रकृतेः परः पंचविंशकः स्वस्मै स्वयं प्रकाशकः
सन्निहृतियासास्थितिः ज्ञातत्त्वं नाम स्वामिनः श्रीचित्तस्मृतेः स्मरणेन स्मर्यमा
भगवच्छेषभूतः

वा० रा० १६

13

सन्

म

प्रयोजनांतरनिवृत्तिः ३ अन्यशेषत्वनिवृत्तिः २ साधनांतरनिवृत्तिः २

च्चेति। शंकात्रयं पापप्राचुर्येण फलगौरवेण उपायफललघुत्वेन च प्राप्ता शंकाः पत्र
यं। परत्वसौलभ्यसौंदर्याणि। पर्वत्रयं स्वरूपविरोधनिवृत्तिः साधनविरोधनिवृत्तिः
प्राप्यविरोधनिवृत्तिः। लोकत्रयं भूम्यंतरीक्षस्वर्गाः। पदत्रयं त्रिपाद्विभूतिः। साम्यत्रयं
रूपसाम्यगुणसाम्यभोगसाम्यानि। नु [illegible] त्रयं। अल्पास्थिरसुखं स्वर्गादि परदारा
परद्रव्यापहारो नरककारणं। स्वदारस्वद्रव्याभिमानः संसारकारणं। एतत्त्रयो
पेक्षा भगवद्भागवतकैंकर्यापेक्षा च मोक्षकारणं॥ अनन्यप्रयोजनस्पर्शो देवसवस
पंचस्पर्शात्मा ज्ञाः। शैवमायावाद एकायन विषयांतरसाधनांतरस्पर्शाः। एतेन
मेण सर्वेश्वरस्य परत्वानंतकल्याणगुणाकरत्वं श्रियः पतित्वं मुक्तिविलक्षणत्वं वि
लंब्य मुक्तिप्रदत्वं भवंति। एतेन नित्यविभूतित्वसर्वेश्वरत्वसर्वरक्षकत्वानामनुसंधाने
जै तुं योग्याः शैववादरूपं चापि परत्वाद्यपहारकाः। श्रीवैष्णवः भगवदाचार्यभागव
त। संसारिणां संनिधौ च कथं तिष्ठेदित्यत्राह। श्रीरामचंद्रस्य सन्निधौ श्रीविभीष

२.

वाक्येनैवेदात्मनो गुणाभूतं ज्ञानं नित्यं भवितुमर्हति। ज्ञानस्य जन्मविनाशौ नाम। श्री० ग्रा० २.
शब्दादिविषयैः संश्लेषविश्लेषौ मालिन्यापहतमाणिक्यतेज इव कर्मकृतसं
बंधापाये आत्मनः स्वभावसिद्धमेव ज्ञानं प्रकाशते। पूर्वमसिद्धं ज्ञानं पश्चा
द्भविष्यतीति नास्ति अस्मत्सिद्धान्ते वक्तुमशक्यं दोषपत्वात्। आनंदमयत्वा
20
त्। आनंदमयत्वं नाम सम्यक् चंद्रिकामलयमारुतवन अनुकूलतया प्रका
शनं। शांतत्वं तु तृपिपासादिराहित्यं। भगवन्नियाम्यत्वं नाम। श्रियः पतिं तं त
त्मातलस्थितोपितन्नियाम्यः सन्तिष्ठतीति यत्। भगवदाधारत्वं नाम आ
वं तं विना स्थितिप्रवृत्त्यसमर्थत्वात् तनुशरीरित्वं। शरीरं यथास्थितिः। भगवदा स्प३
त्मकत्वं नाम। श्रियः पतिरेवांतरात्मा निष्ठतीति। भगवदंशभूतत्वं नाम।
श्रियः पत्युः स्वत्वेन स्थितिः। भगवच्छरीरभूतत्वं नाम। श्रियः पत्युर्दिव्यमंगल त्वं।
विग्रा

णज्ञानस्याप्यपूर्वं । कर्तृत्वं नाम । स्वामिनः श्रीमच्चित्तं सम्यक् विज्ञाय सेवाकर
णसमर्थे पुत्रत्वं क्रियायाः आधारः सन् स्थितः इति यत् । भोक्तृत्वं प्रियः पत्युः
श्रीमच्चित्तानुरूपं कैंकर्यं परिकुर्वाणः तच्चित्तं संतुष्टिं लब्ध्वा संतुष्यति इत्
नियत् । अचित्त्वं नाम समस्तवस्तुविलक्षणतया स्थितः इति । व्यापकत्वं नाम ।
ज्ञानेन सर्वं व्याप्य स्थास्यामि इति यत् एतत् स्वभावतो [illegible] व्याप्तिरेव न स्वरूपतः ।
ज्ञानमयत्वं नाम । ज्ञानमेव स्वस्य शरीरं यथा भवति तथा तिष्ठतीति । निर्मलादिस
रूपं तं सर्वं शरीरे व्याप्यात्मना मे कस्वकारत्वात् । ज्ञानैकरूपत्वं सर्वात्मना मये
करूपमेव देवमनुष्यादिविविधभेदापन्ने ज्ञानस्वरूपमेवास्तीति कथ्यते । ज्ञा
तृत्वस्वरूपतयावस्थानेन ज्ञानस्वरूपमिति कथनं ज्ञानगुणसारत्वात् । आत्म
नो ज्ञानस्य जन्मविनाशराहित्ये । अपरिच्छिन्नत्वे चिदात्मनः स्वत्वं भवेन्नहि

नोऽणुकथनेशरीरव्याप्तिरुक्तेति: केनप्रकारेणेतिचेत् । दीपपरिमितेनिष्ठत्यपि

प्रभाव्याप्यथावतिष्ठति तथाधर्मिणोऽणुत्वेसत्यपिसचधर्मभूतज्ञानव्याप्त्याभिष्ठानिसंको

चविकाशानर्हइवतिष्ठति । बद्धात्मनोज्ञानसंकोचविकाशार्हंसन्तिष्ठति । एवंविधा

श्चात्मानस्त्रिविधाः । नित्यमुक्तबद्धभेदेति । तेषांमध्येनित्याः । कदाचिदपिभगवज्

ज्ञजरादिदुःखमहात्वास्थिताः अनंतगरुडविष्वक्सेनादिनित्यसिद्धाःपुरुषाः

अनादिज्ञानादियुक्ताःसकलसंकोचाऽपायेभगवत्स्वरूपगुणविभूतीःभगव

त्प्रसादेनकरतलामलकवत्साक्षात्कुर्वन्तेचश्रियः पत्यासहसारूप्यसामी

प्यसार्ष्टिसायुज्यानिलब्ध्वानुभूयतेदनुभवजनितप्रीतिविशेषेणवैस्थानस्थले

ष्वास्थिताःसर्वदेशसर्वकालसर्वावस्थोचितशेषवृत्तिंकुर्वाणाःसेवकामुक्ता

बद्धास्त्वऽनादिकर्मभिरावेष्टिताः देवादिशरीरप्रवेशंकुर्वन्तःशरीर

ती॰ प्रा॰ २१

२।

सालोक्य

विग्रहवत्शरीरभूतः सन् तिष्ठतीति । भगवच्छेषभूतत्वं नाम । पुत्रादीनां शेषत्वमि
व पृथक्सिद्धाहमभूत्वा पृथक्सिद्धानर्हः सन्नेपि प्रकारतया भगवच्छेषभू
तः । चंदनकुसुमादिवद्भगवदिष्टविनियोगाय तिष्ठतीत्यर्थः । चिद्रूप्यसाचिद्दृष्टो
तकथनं पारतंत्र्यातिशयव्यंजकं । निर्गुणत्वं नाम प्राकृतसत्वादिगुणराहित्यं । स्वैमस
स्वरूपभूतज्ञानं धर्मभूतज्ञानं आभ्यामात्मज्ञानस्वरूपगुणविभूतिलीलादिक्
स्य स्वयंप्रकाशतया इत्यर्थः । एवंविधस्यात्मनो धर्मभूतज्ञानस्य स्थितिप्रकारः ।
अचिंत्यः परः सत्यः अनंतेः सन् स्थितः । श्रियः पत्युः स्वरूपरूपगुणविभूतीस्त
त्वेन करतलामलकवत् साक्षात्कल्पनदुःस्थितत्वानि विशेषेण अपृथक्सिद्धि
विशेषेण सन्निविष्टः स्थितिः । धर्मी सन् केन प्रकारेण तिष्ठतीति चेत् तत्राह । अ
णुः सन् संकोचविकासानर्हः सन् स्वच्छमेव विषयीकुर्वन् तिष्ठतीत्यर्थः । एतस्यात्म

मसत्यसंकल्पत्वनित्यत्वनंतत्वानाद्यपरिमितगुणोपेतः सन् सात्विकसेव्यः
सन् वेदैकवेद्यः सन् निरुपमपरमपुरुषशब्दवाच्यपुरुषोत्तमपुंडरीकाक्ष
वासुदेवविष्णुनारायणानामधेयः सन् अनेकविधानंतनामसहस्रयुतः सन् श्री
भूलीलासमेतः सन् नित्यदिव्यमंगलविग्रहविशिष्टः सन् अनंतगरुडविष्व
क्सेनादिनित्यपरिजनसेव्यमानः सन् स्थितः सर्वेश्वर एव। एवंविधसर्वेश्व
रस्य स्वरूपं। स्वभावविस्वदाचितोरेकप्रकारेण
संश्लिष्य स्थितः। एवमुभयविभूतिविशिष्टः सन् निरतिशयेश्वराविवरणाधिका
ऽ। भरुल्लालुपेरुमालु। ऐविरुमानारु। कृतोल्वान्। वंगिपुरत्तैयंगारु। कंदा
लयांडान्। एते गोष्ठ्यां स्थिताः अस्माकमभिप्रायकः इत्यन्योन्यं पृष्टाः। प्रह

ना० आ०

२२

२२

कोलुसिल्याल ल्लिंगारवान्तौ २

संबंधिषु ममतां कृत्वा गर्भजन्मजरा नरकादिदुःखमनवरतं संसरंतः स्थिताः
बद्धाः। आत्मनः स्वरूपं ज्ञातृत्वं स्वभावो भगवदेकशेषत्वैकरसत्वं तदुक्तं नतस्य वि
वरेणोचितं हि वरणाधिकारः। विशिष्टस्य परतत्त्वस्य स्थितिः कीदृशीत्यत्राह। ज
गदुपादानादिसर्वकारणं निजगद्व्याप्तिसंकल्पसहस्रैकदेशेन हिरण्यगर्भसंहर
फला णादक्षाज्ञापयितुं समर्थः सन् सर्वकर्मफलप्रदः सन् सर्वकर्माध्यक्षः सन् सजातीय
विजाती यसन्। अखिलहेयप्रत्यनीककल्याणैकतानः सन् ज्ञानमयः सन् बाहुल्यपरि
पूर्णः सन् सर्वाधारः सन् सर्वनियंता सन् सर्ववस्तुशरीरः सन् सर्वमूलभूतः सन् स
र्वमंगलमंगलभूतः सन् अशरणशरण्यः सन् अनालोचितविशेषाशेषलो
कशरण्यः सन् त्रिविधपरिच्छेदरहितः सन्। अपारकारुण्यमाधुर्यगांभीर्यौदा २६
र्यचातुर्यधैर्यशौर्यपराक्रमार्जवमार्दवसौलभ्यसौशील्यवात्सल्यसत्यका

वा०ग्रा०
२३

२३

23

युक्तिवृत्तिसंभावनोचितकालज्ञः प्रपन्नः । अवलोकआनंदकंपितसिरस्कः
श्रियः पतिः । भगवत्स्वरणारविदानंदध्यानामृतसेवाविवेकसार्वभौमः प्रपन्नः । न
दीयप्रवर्तनानुसारिवेदवेदांगनियोक्ता भगवान्समर्पितदुराहारानिस्पृहः प्रपन्नः । प्र
अप्राकृतभवनभांडविशिष्टाहाराभ्यागतः भगवान्समानाधमरहितः प्रपन्नः ।
समानाधिकरहितः श्रियः पतिः । देहाशक्तात्मबुद्धिर्यदि भवति पदं साधुविद्या
त्तृतीयं स्वातंत्र्यांधो यदि स्यात्प्रथममितरशेषत्वधीश्चेद्द्वितीयं । आत्मत्राणोन्मु
खश्चेन्नम इति च पदं बांधवाभासलोलः शब्दं नारायणाख्यं विषयचलधीश्चेच्च
तुर्थी प्रपन्नः । श्रियः पतिः चेतनाचेतनात्मकायाउभयविभूतेर्नियंता । नियंतृत्वं
नाम सकलमपि स्वाभिप्रायमनुसृत्य प्रवृत्तिनिवृत्ती नियतः । अस्मादिव्यात्मरूपं । अखिल
हेयप्रत्यनीकं कल्याणगुणैकतानं सकलतरविलक्षणं अतिसूक्ष्मं च सततदेश

प्रसादं तान्निर्भरत्वानुसंधानादित्युक्तवंतः एषां चतुर्विधानां परिज्ञानं अस्मद्दर्शनस्य प्रमाणपदमिति प्रसादस्यान्त्युक्तवंतः। १

स्वानुपेक्ष्य मालुर्यं विरुद्धानाश्रु कर्मज्ञानभक्तीः अपत्यनुकूलतया कुर्वाणास्तिष्ठामः
इत्युक्तवंतः। तान् चतुर्थोपायनिष्ठा इति प्रसादं कृतवंतः। क्रूरत्वात्तान् अपत्तिविरोधि
ज्ञानानि परित्याज्यानीत्युक्तवंतः। तान् अपत्तिनिश्रयेऽइति प्रसादितवंतः। वंगीपुरुत्ते

उक्तः

ध्येगारे अपत्तिः नमसा हमित्यपमर्थोपि परित्याज्य इत्युक्तवंतः। तान् देहात्माभिमा
नरहित्य पूर्ववारोपवृत्तिभोग्या इति प्रसादं कृतवंतः। कदाचित्यांडान् सिंहस्वप
तः किंचित् ग्रामाश्रित्य स्थितस्य कीटविशेषस्य पर्वतशिखरान् शिखरांतरलंघनसम
र्थोपि यथास्व अपत्तौ नास्ति तथैवाचार्यविषयाकार एवो नारक इत्युक्तवंतः शेषशेषि
णोरपि प्रकारको दृश इत्यत्राह। परस्वरूपोस्वतंत्रः अपन्नः। फलदानस्वतंत्रः श्रियः
पतिः। भगवदायत्तपुरुषः अपन्नः। आश्रितदाढ्यप्रदाता श्रियः पतिः। आपुरारोग्य
ऐश्वर्यनिस्पृहः अपन्नः। निद्रुत्वा ... नानात्रिदुस्साधनयोगदोषमत्रदः श्रियः पतिः। तदीय

२५ दा०ता० २५ २५

विविधसजातीयअप्राकृतो नित्यः अपरिमिततेजाः नित्ययौवनः सर्वांगः सौं
दर्यादिकल्याणगुणयुक्तश्चातिमनोहरः नित्यभोग्यः मुमुक्षुणां शुभाश्रयः संति
इति । तत्र शुद्धसत्वइतिनाम प्राकृतसत्वव्यावृत्तिः । पंचोपनिषन्मयोनाम ।
पंचोपनिषन्मंत्रप्रधानपंचादरवाच्यमप्राकृतं तद्द्रव्यपंचकोपादानतयानि
इति स्वस्वसर्वदाभिमतइति कादाचित्काभिमत बद्धात्मदेहेभ्यो व्यावृत्तिः । दि
व्यात्मस्वरूपतदाश्रयगुणप्रकाशकोनाम तिरोधानादिवद्रूपादिशरीरेभ्यो
व्यावृत्तिः एकरूपोनाम सततपरिणामिन्यामूलप्रकृतेर्व्यावृत्तिः । अतएवस
विविधसजातीयः सन् अप्राकृतः सन्निहिति । नित्यत्वंनाम उत्पत्तिविनाशरा
हित्यं । अपरिमिततेजस्त्वंनाम स्वस्मात्स्वप्रकाशादादित्यादितेजःपदार्थो

तः कालतो वस्तुतश्चापरिछिन्नं ज्ञानानंदमयं च सन्तिष्ठति। अखिलहेयप्रत्यनी
कं नाम। अचिद्गतपरिणामादिदोषराहित्यं चिद्गतदुःखित्वादिदोषराहि
त्यं कल्याणैकतानत्वं नाम कल्याणगुणानामाश्रयं संतिष्ठति॥ अनुभवसमये
स्वस्यान्येषामपुनर्विशेषतया अनुकूलं सन्तिष्ठतीति। सकलेतरविलक्षणं ना
म समस्तचेतनाचेतनेभ्यो व्यावृत्तं। ज्ञानसुखत्वं नाम सुखचेतनस्यापि व्याप्यस्था
तुं समर्थं सूक्ष्मं वस्त्विति यावत्। देशतः कालतो वस्तुतः अपरिछिन्नत्वं नाम विभुत्वे
न सर्वस्यापि स्वयं प्रकाशनं स्वयं च कार्यं सर्वं विना निरतिशयनियतं। ज्ञानानंदमय
त्वं नाम अनन्तरूपज्ञानमयत्वं तन्नाम सर्वप्रकाशत्वं सदानुकूलं सन्तिष्ठतीति
यावत्। यस्मादिव्यमंगलविग्रहः शुद्धसत्वः पंचोपनिषन्मयः सन् सर्वदा स्वाभिमतः
दिव्यात्मस्वरूपस्यानवधिकातिशयकल्याणगुणानां च प्रकाशकः सन् एकरूपः सन्

२५ कैंकर्यमेव कर्तुमिति प्रार्थयंति । दिव्यात्मगुणाः ज्ञानशक्त्यादयस्तद्वाः सौशील्यादयः २५
एतेषामसंख्यातानां प्रत्येकं निरवधिकत्वं ज्ञानशक्त्यादयः षड्गुणाः अनुकूलप्र
तिकूलविभागं विना सर्वसाधारणाः संतः निवृत्तिसौशील्यादयः आश्रितविषयाः सौ
25 र्यवीर्यादयः आश्रितविरोधिविषयाः । एते सर्वे नित्याश्रितानां भोग्याः । एवंविधस्व
स्वरूपगुणवानीश्वरः परव्यूहविभवादिरूपभेदविभूत्या निर्वहणं करोति । तत्र प
रावस्था षाड्गुण्यादिसमस्तकल्याणगुणैः सह स्वस्वरूपानुरूपदिव्यमंगलविग्रहे स्थित्वानुभ
वतां नित्यमुक्तानामनुभवन्नु निरूह्ली नियमन । व्यूहावस्था तु लीलाविभूतिनिर्वहणार्थं प
वीर्य३ वीतः ज्ञानबलैश्वर्यशक्तितेजसां गुणानां मध्ये द्वयं द्वयं प्रकटयन् संहारसृष्टिस्थि
त्यर्थं संकर्षणप्रद्युम्नानिरुद्धरूपेण वर्तीर्यस्थितिः । एतन्त्रेरवे । किमिति चेन्नपरमप २५
दवासिनः स्वमनुभवंतः निवृत्तिरनेयथा नर्थेव प्रकृतिमंडलवासिनोपि प्रसम

प्यन्ति तद्दृ इति यथाश्रुतीयनेन तथा निरूपनीतियत् । नित्ययौवनस्वभावत्वं इति नाम ।
अवतारेषु बाल्यमस्वाभाविकं च जरावस्थारादिमप्रवकथयति । सर्वगंधो नाम । गं
धवत्पदार्थो नाम पिप्परिमलहेतुः सौंदर्यादिकल्याणगुणसमुल्लत्वं नित्यापूर्वावयव
सौकुमार्यं च समुदायशोभावत्वं स्पास्तीतियत् । अतिमनोहरत्वं नाम विषयप्रव
णानाम प्रमनो हरतीतियत् । नित्यमुक्तभोग्यत्वं नाम । परब्रूहविभवेषु भोग्यत्वं
मुमुक्षूणां सुभाश्रयत्वं नाम । उपासकस्य यावन्मोक्षमुपास्यं इतियत् । अपन्नस्या
श्रयणावेलायां सुभाश्रयः सन् अनंतरं भोग्यः सन्निरूपनीतियत् । परमपदं च तत्
तत्पदार्थाश्च नित्यमुक्तविग्रहाश्च सुद्दसत्वमयाश्च पंचोपनिषन्मयाः संत
ऽ ति अनेन कारणेन मुक्तस्य जल्पनातवै कर्यप्रवेशसमये विलक्षणादेशि
काः विलक्षणावैकल्यापकरणे निविलक्षणाः विग्रहः विलक्षणो देशश्चेति सर्वं

स्थितसमस्तचेतनाचेतनसत्ताहेतुः व्याप्तिः । तत्रोपासकानां हृदये सन्नियहः
शुभाश्रयतया ऽवस्थानं चेत्युक्तः प्रकारः एवं चिदचिदीश्वर तत्त्वत्रयमपि सं
ग्रहेण कथितं विस्तरेण कथनं त्वेकेन तत्त्वस्य स्वरूपस्वभावयोरपरिच्छि
न्नत्वात् [illegible] चेतनाचेतनतत्त्वे ईश्वरस्य प्रकारे तयोः प्रकारी आश्रयः प
तिः ईश्वरः तस्मात् प्रकारी नास्तीति कृत्वा ऽस्मद्दर्शनस्य तत्त्वमेकं वा भवति ॥
चिदचित्त्रिविधप्रकारत्वमाह । बद्धमुक्तनित्यरूपस्य चित्त्रयस्य प्राकृताप्रा
कृतकालरूपस्याचित्त्रयस्य निमित्तोपादानसहकारि [illegible] रूपं आश्रयः पति
एवं भवन् निरतिशयानन्दमयाद्विभूत्योर्निमित्तादिकारणं आश्रयः पतिरेवेति
तं चिदचिन्त्यरूपस्यापि निमित्तोपादानसहकारित्वं कथ्यते निमित्तत्वे हेतुः
सत्त्वस्थितं इच्छाविशिष्टं ब्रह्म निमित्तकारणं सत्ताहेतुर्वापि विशिष्टमेवउपा

दनुभवयोग्या एव एवं सन्ति ते संसारिणो भूत्वा महदादिमुखाः शब्दादिविषयप्रवणाः सं
न्तः एवंविधेभ्यः संसारिभ्यः नुमहे तु वा श्रीमन्निचितेन परिस्फुरदपारकारुण्यमेव तेषां
विभवावस्थानु देवतिर्यङ्मनुष्यस्थावरात्मकचतुर्विधशरीरेषु स्वविग्रहं स
जातीयाकृत्याऽजहत्स्वभावप्रकारतयावतीर्य स्थितिः । साक्षाद्विभवावताराः
श्रीनृसिंहरामकृष्णादयः । कांश्चिच्चेतनाननुप्रविश्य स्वरूपेणाविश्य वर्तनं स्वरूपा
वेशावताराः परशुरामबलभद्रादयः । कांश्चिच्चेतनान्कार्यकाले शक्त्या आवि
त श्य वर्तनं शक्त्यावेशावताराः ककुत्स्थमुचुकुन्दादयः । अर्चावतारो नाम
आश्रितानामभीप्सितद्रव्यमधिष्ठाय नत्वानातकतद्दिव्यविग्रहेष्ठ यथा समादरस्तत्सम
दरं कृत्वा आश्रितपराधीनः सन् श्रीरंगश्रीवेंकटाचलादिदिव्यदेशेषु विग्र
हेषु वर्तनं कालानवच्छिन्नं विना ... भावांतरम् । अन्तर्यामित्वं नाम । तन्नयथा विभूत्य व

पस्य त्रिविधकारणत्वं कथ्यते । ज्ञानानंदलक्षणस्यात्मनः स्वरूपस्य वा किं स्वरूप
मात्रित्वाच्च सद्भावो वा निर्विशेषधर्मिस्वरूपमवलंब्य बलेन मानो धर्मः स्वगुणत्वे
रूपमवलंब्य नरतिशयत्वगुणाइत्यत्र लक्षणस्य समानित्या विशेषणासत्त्वस
द्भावादिमद्धर्मिरेकेण व्यवसद्भावाद्यभावेन तत्सद्भावादिहेतुमततु विशेष्य
त्वादिविशिष्टं त्रिविधकारणं भवति । अस्य स्वरूपस्य विशेषणास्यैव प्रती
यमानत्वात् विशेषणाभूतयोः चेतनाचेतनयोः विशे[illegible]ष्यस्वरूपनवलं
ब्येवष्टीमानत्वाच्च । एतयोः स्वरूपोदयहेतुविशेषणत्वानुसंधितशेषत्व
त्वात् तयोर्विशेष्यत्वे कारणत्रैविध्यमपि कथनीयं तस्मात् यथा व्यापकधार
कत्वयोः कारणत्रैविध्यकथने व्यापकत्वस्य तन्मन्त्रस्वरूपसत्ताहेतुत्वा
द्धारकत्वस्य निःसंस्थितिहेतुत्वाच्च नेव्यापकधारकत्वस्वरूपोदयहेतुर्न भव

सहकारिनित्यान्मुक्तान्त्र त्यपि श्रियःपत्युः त्रिविधकारणत्वं अनादिसन्तुस्थितं केवलेच्छाविशिष्टं ५

दानं । वस्तुत्वे हेतुविनियोगविशिष्टं ब्रह्मसहकारिकारणं । एवं तदधीनसत्ता
स्थितिप्रवृत्तिनिवृत्तिचिच्चाचिच्चबद्धमुक्तनित्यरूपैः शाहाणाशाकृतनाल
पैरपि त्रैविध्येन विभक्तं स तिष्ठति । बद्धवर्गं प्रतीश्वरस्य त्रिविधकारणत्वमुच्य
ते । संकल्परूपज्ञानविशिष्टं निमित्तकारणं । सूक्ष्मचिदचिद्विशिष्टमुपादानं ज्ञानश
क्त्यादिविशिष्टं निमित्तं । अत्राकृताचिज्जीवविशिष्टं उपादानं । ज्ञानशक्त्यादिविशि
ष्टसहकारि शाकृताशाकृतदृष्टेभ्यः ततं आत्मनां पृथक् पृथक् निमित्तादिकथ
नेन तद्धर्मैः सह उपादानादिमत्त्रिमूर्तीनि कथितं । अयमेव विशिष्टः श्रीकृष्ण ॥
एतान्यवस्थाधातुप्रत्ययविशिष्टब्रह्मणो दृश्यन्ते । देहेन्द्रियविलक्षणानन्दरूप
ज्ञानचित्स्वरूपानाद्यचित्संबन्धनिर्योगतदनन्वयबद्धमुक्तनित्यरूपप्रका
रविशेषाणां भगवत्स्वरूपं निमित्तोपादानसहकारिकारणं भवति । तत्र स्वरू